# READING - 13

हा रामलक्ष्मणौ वनं गन्तारौ । ताभ्यां सह वैदेह्यपि गमिष्यति । हा रघुकुलनन्दनेन विना कथं जीवितव्यमिति विलपन्तो ऽयोध्यावासिनो जनाः शुष्कजले सरसि मत्स्या इवादृश्यन्त । भयशोकपीडितराजो ऽप्यनुज्ञार्थमागच्छन्तं सुतं दृष्ट्वा पुत्ररहितो ऽचिरान्मरिष्यामीति चिन्तयन्नवदत्स्थातव्यं वत्स न त्वया गन्तव्यम् । हे राघव मम वाक्यं न केवलं त्वया श्रोतव्यं हृदये ऽपि धातव्यम् । कैकेयीवरदानमोहितस्य मम वचनेन त्वया राज्यं न त्याज्यम् । अहं निग्रहणीय इति । तच्छ्रुत्वा सत्यवादी रामो ऽञ्जलिं कृत्वावदत् । न वक्तव्यमिदं वचनं न मन्तव्यमपि । राज्यं करोतु भरतः । अहं वनवासमाचरिष्यामि । प्रतिज्ञान्ते भवत्पादौ पुनर्ग्रहीष्यामि । अपि च यान्गुणानद्य प्राप्स्यामि कः श्वो मह्यं दास्यति तान् । अतो ऽहं सराष्ट्रजनधनधान्यां पृथिवीं विसृष्टास्मि । भरताय सा देया । अद्य वनं गन्तास्मीति । ततः पितरं त्यक्त्वा ससीतालक्ष्मणो रामस्त्यक्तभोगस्य मे वने वन्येन जीवतः किं कार्यं धनेनेति चिन्तयन्सर्वं धनं ब्राह्मणेभ्यो दत्त्वा मुनिवस्त्रं गृहीत्वा वनं गन्तुं प्रारभत । ततो विगतानन्दा जना रामविरहितनगरं चन्द्रहीनमिवाकाशं तोयहीनमिवार्णवमपश्यन् । दशरथो ऽपि प्रियपुत्रं वनगतं विज्ञाय शोकशल्यहतमना मुनेः शापमनुस्मृत्य हा हा लभे ऽहं मुनिशापफलमिति वदन्नेव महाराजः प्राणानत्यजत् ॥